नित्यधामा गुणातीतः साक्षाद्वृन्दावनेश्वरः ।
असौ प्रकटलीलायां वासुदेवोऽभवत् प्रभुः ॥
गोपीनां कामपूर्त्त्यै नित्यानां रमणाय च ।
गोपालानां विनोदाय स्वयं नन्दसुतोऽभवत् ॥”
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दावनेश्वरी, स्त्री (वृन्दावनस्येश्वरी ।) राधा । यथा,—
“राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
साक्षाल्लक्ष्मीस्तु विज्ञेया प्राकट्येनैव पार्व्वति ! ॥
वृषभानुसुता या तु नित्यानन्दस्वरूपिणी ।
गान्धर्व्विकान्तलीलायां श्रीः श्यामा कृष्णवल्लभा ।
वृन्दावनेश्वरी राधा साक्षात् कृष्णात्मिका परा ॥”
इति पाद्मोत्तरखण्डे ६७ अध्यायः ॥

वृन्दिष्ठः, त्रि, (अयमेषामतिशयेन वृन्दारकः श्रेष्ठः । वृन्दारक + इष्ठन् । “प्रियस्थिरेति ।” ६।४।१५७ । वृन्दादेशः ।) अयमनयोरेषां वा अतिशयेन वृन्दारको देवो मुख्यो वा । इति मुग्धबोधटीकायां दुर्गादासः ॥

वृन्दीयान्, [स्] त्रि, (अयमनयोरतिशयेन वृन्दारकः । वृन्दारक + ईयसुन् । प्रियस्थिरेति वृन्दादेशः ।) वृन्दिष्ठः । अयमनयोरेषां वा अतिशयेन वृन्दारकः इत्यर्थे ईयसुप्रत्ययेन निष्पन्नमिदम् । इति मुग्धबोधव्याकरणम् ॥

वृश, इर् य वृत्याम् । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) इर्, अवृशत् अवर्शीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । य, वृश्यति वरं कन्या । इति दुर्गादासः ॥

वृशः, पुं, (वृ + “नन्दिवाश्युच्छृशदीति ।” उणा० ४ । १०४ । इति शक् ।) उन्दुरुः । इति शब्दरत्नावली ॥ वासकः । इत्यमरटीकायां भरतः ॥

वृशा, स्त्री, ओषधीविशेषः । इत्युणादिकोषः ॥

वृश्चिकः, पुं, (व्रश्च छेदने + “वृश्चिकृष्योः किकन् ।” उणा० २ । ४० । इति किकन् ।) शूककीटः । इत्यमरः ॥ शुयापोका इति भाषा ॥ तत्पर्य्यायः । शूककीटकः २ । इति शब्दरत्नावली ॥ कीटविशेषः । विछा इति भाषा । तत्पर्य्यायः । अलिः २ द्रोणः ३ दृश्चनः ४ । इति राजनिर्घण्टः ॥ द्रुणः ५ । इति शब्दरत्नावली ॥ पृदाकुः ६ अरुणः ७ अली ८ । इति जटाधरः ॥ * ॥ वृश्चिकविषस्य लक्षणमाह ।
“दहत्यग्निरिवादौ च भिनत्तीवोर्द्ध्वमाशु च ।
वृश्चिकस्य विषं याति पश्चाद्दंशेऽवतिष्ठते ॥”
असाध्यवृश्चिकदष्टस्य लक्षणमाह ।
“दष्टोऽसाध्यैस्तु हृद्घ्राणरसनोपहतो नरः ।
मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहात्यसून् ॥”
असाध्यैर्व्वृश्चिकैस्त्रिषामेवानुवृत्तेः । हृदादिषूपहतः हृदादिकार्य्यरहितो भवति । अत्यर्थं वेदनार्त्त इत्यन्वयः ॥ * ॥ अस्य चिकित्सा ।
“जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः ।
सुखोष्णो मधुना लेपाद्वृश्चिकस्य विषं हरेत् ॥
गन्धमाघ्राय म्लदितस्य्यावर्त्तदलस्य तु ।
वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्व्विषः ॥”
इति भावप्रकाशः ॥ * ॥

अथ वृश्चिकविषहरमन्त्रः । ॐ सर स्फुः ह ॐ ह्रिलि मिलि चिलि चिलि स्फुः ब्रह्मणे स्फुः सर्व्वेभ्यो देवेभ्यः स्फुः । इति तन्त्रसारः ॥ * ॥ (यथा, ऋग्वेदे । १ । १९१ । १६ ।
“वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥”
“वृश्चिकस्यैतद्विषं अरसमसारं बाधकं न भवति ।”
इति तद्भाष्ये सायणः ॥ विषस्य विशेषविवरणन्तु अत्रैव १—१६ मन्त्रेषु द्रष्टव्यम् ॥ * ॥) मेषादिद्वादशराश्यन्तर्गताष्टमराशिः । अस्याधिष्ठात्री देवता वृश्चिकः । विशाखाशेषपादानुराधाज्येष्ठासमुदायेनैतद्राशिर्भवति । स च शीर्षोदयः । श्वेतवर्णः । जलराशिः । उत्तरदिक्पतिः । कफप्रकृतिः । जलचरः । बहुपुत्त्रः । बहुस्त्रीसङ्गः । चित्रतनुः । विप्रवर्णश्च । अस्य विशेषसंज्ञाः । सौम्यः । अङ्गना । युग्मम् । समः । स्थिरः । पुष्करः । सरीसृपजातिः । ग्राम्यः । तद्राशिजात एतादृशो भवति । मौनी । मन्दगतिः । कृपालुः । कुबुद्धिः । नीचसङ्गश्च । इति बृहज्जातकादयः ॥ * ॥ तल्लग्नजातफलम् ।
“वृश्चिकोदयसंजातः शौर्य्यवानतिदुष्टधीः ।
भवेद्विज्ञानसम्पन्नो विग्रही सुभगः सुधीः ॥”
इति कोष्ठीप्रदीपः ॥ * ॥
ओषधीभेदः । इति मेदिनी ॥ हालिकः । हाजः । इति संक्षिप्तसारोणादिवृत्तिः ॥ मदनवृक्षः । कर्कटः । गोमयकीटः । इति भरतः ॥ अग्रहायणमासः । इति सारसुन्दरी ॥

वृश्चिकप्रिया, स्त्री, (वृश्चिकस्य प्रिया ।) पूतिका । इति शब्दमाला ॥

वृश्चिकर्णी, स्त्री, आखुकर्णी । इति राजनिर्घण्टः ॥

वृश्चिका, स्त्री, क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । नखपर्णी २ पिच्छिला ३ अलिपत्रिका ४ । अस्या गुणाः । पिच्छिलत्वम् । अम्लत्वम् । अन्तर्वृद्धगादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

वृश्चिकाली, स्त्री, (वृश्चिकानामालिर्यत्र ।) क्षुपविशेषः । विछाटी इति भाषा । तत्पर्य्यायः । वृश्चिपत्री २ विषघ्नी ३ नागदन्तिका ४ सर्पदंष्ट्रा ५ अमरा ६ काली ७ उष्ट्रधूसरपुच्छिका ८ । इति रत्नमाला ॥ विषाणी ९ नेत्ररोगहा १० उष्ट्रिका ११ अलिपर्णी १० दक्षिणावर्त्तकी १३ कालिका १४ आगमावर्त्ता १५ देवलाङ्गूलिका १६ करभी १७ भूरिदुग्धा १८ कर्कशा १९ स्वर्णदा २० युग्मफला २१ चीरविषाणिका २२ भासुरपुष्पा २३ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । हृद्वक्त्रशुद्धिकारित्वम् । रक्तपित्तविबन्धारोचकापहत्वम् । बल्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“वृश्चिकाली विषघ्नी तु कासमारुतनाशिनी ॥”
इति राजवल्लभः ॥

वृश्चिपत्री, स्त्री, वृश्चिकाली । इति रत्नमाला ॥

वृश्चीरः, पुं, श्वेतपुनर्णवा । इति रत्नमाला ॥

वृष, उ सेचने । प्रजनैश्वर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अक० च-सेट् । क्त्वावेट् ।) उ, वर्षित्वा वृष्ट्वा । इति दुर्गादासः ॥

वृष, क ङ प्रजनैश्ये । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-अक०-सेट् ।) क ङ, वर्षयते । अस्य पञ्चमस्वरानुबन्धो लेखकभ्रमकृतः सुधीभिर्हेयः । आन्तेभ्यः सर्व्वत्र नित्यम् साम्प्रदायिकत्वात् । न च शास्त्रमनुरोधात् पाठः इति वाच्यम् । तर्हि अनुक् यत्नौ । क ङ वङ्ग वचने । हृत क ङ दीप्तौ । दिव क ङ परिकूजने । कदि वर्हे । वृष क ङ शक्तिबन्धे । अचक् वधेऽनादरे । इत्येषामष्टानामपि पञ्चमस्वरानुबन्धापत्तेः वस्तुतस्तु एषां पञ्चमस्वरानुबन्धः प्राचीनपठितोऽप्यनर्थः । अतएव रमानाथोऽपि एषामुदनुबन्धः पूर्व्वपठितधातवोऽर्थान्तरेषु चुरादयः स्युर्न्नवेति पृथग्धातव इति ज्ञापनार्थं इत्याह । प्रजनो गर्भग्रहणं ऐश्यमैश्वर्य्यम् । इति दुर्गादासः ॥

वृषं, क्ली, (वृष ऐश्ये + कः ।) वर्हम् । इति शब्दमाला ॥

वृषः, पुं, (वर्षति सिञ्चति रेत इति । वृष सेचने + कः ।) पुङ्गवः । एँड़े इति भाषा । तत्पर्य्यायः । उक्षा २ भद्रः ३ बलीवर्द्दः ४ ऋषभः ५ वृषभः ६ अनड्वान् ७ सौरभेयः ८ गौः ९ । इत्यमरः ॥ शृङ्गी १० ककुद्मान् ११ । इति शब्दरत्नावली ॥ शिखी १२ गन्धमैथुनः १३ पुङ्गवः १४ । इति जटाधरः ॥ * ॥ अस्य लक्षणादि यथा,—
“धर्म्मेभलक्षणैर्युक्ता वसन्तोऽत्र चतुष्पदाः ।
गावः कृतयुगे सृष्टाः स्वयमेव स्वयम्भुवा ।
ब्रह्मक्षत्त्रियविट्शूद्रजातिभेदाच्चतुर्व्विधाः ॥
शुक्लाङ्गाः सुचयोऽक्रुद्धा मृदवः शुद्धचेतसः ।
अल्पाशिनो बहुबला वृषभा ब्रह्मजातयः ॥
इयोर्लक्षणसम्बन्धात् द्विजातिर्व्वृषभो भवेत् ।
त्रिलक्षणसमावेशात् त्रिगुणः स वृषाधमः ॥
पीताङ्गा मृदवः शुद्धा अक्रोधा भारवाहिनः ।
यदृच्छाभोजिनः चौरा वृषभा वैश्यजातयः ॥
कृष्णाङ्गाः क्रूरहृदया अपवित्राः सदाशिनः ।
दृढदृष्टयरोषाश्च वृषभाः शूद्रजातयः ॥
इयोर्लक्षणसम्पर्कात् द्विजातिर्व्वृषभो भवेत् ॥” * ॥
चाक्षुस्तु ।
“पृथ्वीतले समुत्पन्ना गवाश्वा ये चतुष्पदाः ।
गुणत्रयविभेदेन तेषां भेदत्रयं भवेत् ।
एतन्मतानुसारेण भोजः प्राह महीपतिः ॥
ये शुक्लाः शुचयः शुद्धा भृशं भारवहा अपि ।
बह्वाशिनः स्वल्परोषास्ते वृषाः सात्त्विका मताः ॥
रक्तारक्तरुचः शुद्धा दृढा भारवहाः शुभाः ।
बह्वाशिनो बहुबलास्ते वृषा राजसा मताः ॥
विवर्णा विकृताङ्गाश्च निर्ब्बला स्वल्पभोजिनः ।
अपवित्रा दृढद्रोषास्ते वृषास्तामसा मताः ॥
लक्षणद्वयसम्बन्धात् द्विगुणो वृषभो भवेत् ।